अष्टमः पाठः

# अहमपि विद्यालयं गमिष्यामि



मालिनी – (प्रतिवेशिनीं प्रति) गिरिजे! मम पुत्रः मातुलगृहं प्रति प्रस्थितः काचिद् अन्यां कामपि महिलां कार्यार्थं जानासि तर्हि प्रेषय।

गिरिजा – आम् सखि! अद्य प्रातः एव मम सहायिका स्वसुतायाः कृते कर्मार्थं पृच्छति स्म। श्वः प्रातः एव तया सह वार्ता करिष्यामि।

(अग्रिमदिने प्रातः काले षट्वादने एव मालिन्याः गृहघण्टिका आगन्तारं कमपि सूचयति मालिनी द्वारमुदघाटयति पश्यति यत् गिरिजायाः सेविकया दर्शनया सह एका अष्टवर्षदेशीय, बालिका तिष्ठति)



दर्शना – महोदये! भवती कार्यार्थं गिरिजामहोदयां पृच्छति स्म कृपया मम सुतायै अवसरं प्रदाय अनुगृह्णातु भवती।

मालिनी – परमेषा तु अल्पवयस्का प्रतीयते। किं कार्यं करिष्यत्येषा? अयं तु अस्याः अध्ययनस्य क्रीडनस्य च कालः।

दर्शना – एषा एकस्य गृहस्य संपूर्ण कार्यं करोति स्म। सः परिवारः अधुना विदेशं प्रति प्रस्थितः। कार्याभावे अहमेतस्यै कार्यमेवान्वेषयामि स्म येन भवत्सदृशानां कार्यं प्रचलेत् अस्मद्सदृशानां गृहसञ्चालनाय च धनस्य व्यवस्था भवेत्।



मालिनी – परमेतत्तु सर्वथाऽनुचितम्। किं न जानासि यत् शिक्षा तु सर्वेषां बालकानां सर्वासां बालिकानां च मौलिकः अधिकारः।

दर्शना – महोदये! अस्मद् सदृशानां तु मौलिकाः अधिकाराः केवलं स्वोदरपूर्त्तिरेवास्ति। एतस्य व्यवस्थायै एव अहं सर्वस्मिन् दिने पञ्च-षड्गृहाणां कार्यं करोमि। मम रुग्णः पतिः तु किञ्चिदपि कार्यं न करोति। अतः अहं मम पुत्री च मिलित्वा परिवारस्य भरण-पोषणं कुर्वः। अस्मिन् महार्घताकाले मूलभूतावश्यकतानां कृते एव धनं पर्याप्तं न भवति तर्हि कथं विद्यालयशुल्कं, गणवेषं पुस्तकान्यादीनि क्रेतुं धनमानेष्यामि।

मालिनी - अहो! अज्ञानं भवत्याः। किं न जानासि यत् नवोत्तर-द्वि-सहस्र (2009) तमे वर्षे सर्वकारेण सर्वेषां बालकानां, सर्वासां बालानां कृते शिक्षायाः मौलिकाधिकारस्य घोषणा कृता । यदनुसारं षड्वर्षेभ्यः आरभ्य चतुर्दशवर्षपर्यन्तं सर्वे बालाः समीपस्थं सर्वकारीयं विद्यालयं प्राप्य न केवलं निःशुल्कं शिक्षामेव प्राप्स्यन्ति अपितु निःशुल्कं गणवेषं पुस्तकानि, पुस्तकस्यूतम्, पादत्राणम्, माध्याह्नभोजनम्, छात्रवृत्तिम् इत्यादिकं सर्वमेव प्राप्स्यन्ति।

दर्शना - अप्येवम् (आश्चर्येण मालिनीं पश्यति)

मालिनी - आम्। वस्तुतः एवमेव।

दर्शना - (कृतार्थतां प्रकटयन्ती) अनुगृहीताऽस्मि महोदये! एतद् बोधनाय। अहम् अद्यैवास्याः प्रवेशं समीपस्थे विद्यालये कारयिष्यामि।


दर्शनायाः - पुत्री- (उल्लासेन सह) अहं विद्यालयं गमिष्यामि! अहमपि पठिष्यामि! (इत्युक्त्वा करतलवादनसहितं नृत्यति मालिनीं प्रति च कृतज्ञतां ज्ञापयति)

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **प्रतिवेशिनी** | - | पड़ोसन | neighbour |
| **प्रेषय** | - | भिजवा दो | send |
| **श्वः** | - | आने वाला कल | tomorrow |
| **गृहघण्टिका** | - | घण्टी | bell |
| **अष्टवर्षदेशीया** | - | लगभग आठ साल की | approximately eight years old |
| **क्षमा** | - | समर्थ | able to do |


Reprint 2024-25

| | | | |
|---|---|---|---|
| भवत्सदृशानाम् | – | आप जैसों का | like yours |
| अस्मत्सदृशानाम् | – | हम जैसों का | people like us |
| स्वोदरपूर्त्तिरेव | – | स्व+उदरपूर्त्ति+एव अपना पेट भरना ही | to arrange for food |
| मद्यपः | – | शराब पीने वाला | drunker |
| महार्घताकाले | – | महंगाई के समय में | in todays age of dearness? |
| पादत्राणम् | – | जूते | shoes |




**1. उच्चारणं कुरुत-**

अग्रिमदिने, षड्वादने, अष्टवर्षदेशीया, अनुगृह्णातु, भवत्सदृशानाम्, गृहसञ्चालनाय, व्यवस्थायै, महार्घताकाले, अद्यैवास्याः, करतलवादसहितम्!

**2. एकपदेन उत्तराणि लिखत-**

(क) गिरिजायाः गृहसेविकायाः नाम किमासीत्?

(ख) दर्शनायाः पुत्री कति वर्षीया आसीत्?

(ग) अद्यत्वे शिक्षा अस्माकं कीदृशः अधिकारः?

(घ) दर्शनायाः पुत्री कथं नृत्यति?

**3. पूर्णवाक्येन उत्तरत-**

(क) अष्टवर्षदेशीया दर्शनायाः पुत्री किं समर्थाऽसीत्?

(ख) दर्शना कति गृहाणां कार्यं करोति स्म?

(ग) मालिनी स्वप्रतिवेशिनीं प्रति किं कथयति?

(घ) अद्यत्वे छात्राः विद्यालये किं किं निःशुल्कं प्राप्नुवन्ति?

**4. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

(क) <u>मालिनी</u> द्वारमुद्घाटयति?

(ख) शिक्षा <u>सर्वेषां बालानां</u> मौलिकः अधिकारः।

(ग) दर्शना आश्चर्येण <u>मालिनीं</u> पश्यति।

(घ) दर्शना तस्याः पुत्री च मिलित्वा <u>परिवारस्य</u> भरणपोषणं कुरुतः स्म।

**5. सन्धि विच्छेदं पूरयत-**

| | | | | |
|---|---|---|---|---|
| (क) ग्रामं प्रति | - | ग्रामम् | + | ________ |
| (ख) कार्यार्थम् | - | ________ | + | अर्थम् |
| (ग) करिष्यत्येषा | - | करिष्यति | + | ________ |
| (घ) स्वोदरपूर्त्तिः | - | ________ | + | उदरपूर्त्तिः |
| (ङ) अप्येवम् | - | अपि | + | ________ |

**6. (अ) समानार्थकपदानि मेलयत-**

| | |
|---|---|
| आश्चर्येण | पठनस्य |
| उल्लासेन | समयः |
| परिवारस्य | प्रसन्नतया |
| अध्ययनस्य | विस्मयेन |
| कालः | कुटुम्बस्य |

**(आ) विलोमपदानि मेलयत-**

| | |
|---|---|
| क्रेतुम् | दूरस्थम् |
| श्वः | कथयति |



Reprint 2024-25

| | |
|---|---|
| ग्रामम् | विक्रेतुम् |
| समीपस्थम् | ह्यः |
| पृच्छति | नगरम् |

**7. विशेषणपदैः सह विशेष्यपदानि योजयत-**

| | |
|---|---|
| सर्वेषाम् | बालिकानाम् |
| मौलिकः | विद्यालयम् |
| एषा | बालकानाम् |
| सर्वकारीयम् | अधिकारः |
| समीपस्थे | गणवेषम् |
| सर्वासाम् | अल्पवयस्का |
| निःशुल्कम् | विद्यालये |

## ध्यातव्यम्



'सर्वे पठन्तु अग्रे सरन्तु' च इति भावनामङ्गीकृत्य विकसितोऽयं एकः संवादात्मकः पाठः। प्रायेण आर्थिकदृष्ट्या दरिद्रपरिवारेषु लघु लघु बालकाः चायादिविपणिसु अन्येषु च गृहेषु कार्ये नियोजिताः क्रियन्ते येन धनस्य अर्जनं भवेत् तेषां गृहस्य कार्यं चलेत्। एवं कृते ते जनाः स्वसंततीः शिक्षायाः मौलिकाधिकारात् वञ्चयन्ति। प्रारम्भे शिक्षा यः केवलं संवैधानिकोऽधिकार आसीत् स इदानीं मौलिकाधिकारः जातः। इमामेव भावानां बोधयितुं पाठेऽस्मिन् प्रयत्नो विहितः।